संस्कृत व्याख्या -

असंशयं क्षत्र परिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥

प्रस्तुत श्लोकः महाकवि ~~काल~~कालिदासस्य अभिज्ञान-शाकुन्तलनाटकात् उद्धृतोऽस्ति। कालिदासः संस्कृत-साहित्यस्य महान् कविः अस्ति। 'अभिज्ञान-शाकुन्तलम्' विश्वविख्यातनाटकम् अस्ति। महाभारतस्य शान्तिपर्वे एकोपाख्यानं कथा रूपेण उद्धृतोऽस्ति दुष्यन्तशकुन्तलयोः कथा। ~~विस्तृतरूपेण~~ विस्तारं दृश्यते अभिज्ञान-शाकुन्तल नाटके।

प्रथम-अंके प्रस्तुतोऽयं श्लोकः दुष्यन्तस्य मानसिक-स्थितिं प्रदर्शयति। राजा यदा शकुन्तलां तपोवने पश्यति तदा तस्याः सौन्दर्याभिभूतं भवति। तां प्रति आकृष्टः राजा कथयति यत् किं कुलपतेः कण्वस्य एका कन्या समानजातीयं तज्जाता भवेत् अथवा अलं शङ्कया -

('अन्वय - असंशयं क्षत्रपरिग्रहक्षमा यत् (यत्) अस्याम् आर्यम् मे मनः अभिलाषि। अन्तःकरण प्रवृत्तयः हि सन्देहपदेषु वस्तुषु सतां प्रमाणम्।)

इयं शकुन्तला क्षत्रियद्वारा ग्रहणयोग्या अस्ति किञ्च एतस्यां सदाचारसम्पन्नं मम हृदयं अनुरक्तम्। निश्चितरूपेण हृदयस्य व्यापाराः संशयस्य स्थानभूतेषु ~~पदार्थेषु~~ पदार्थेषु सज्जनानां कर्तव्यनिर्णायकम् —

Scanned with CamScanner

प्रमाणमन्तःकरणप्रवृत्तयः।'

व्याकरणम् - न संशयः यत्र - बहुव्रीहि, संशयस्य

अभावः - अव्ययीभावः। द्वन्द्वोऽस्ति वंशस्थम्।

व्युत्पत्तिः - असंशयम् - न + सम् + √शी + अच्।

परिग्रहः - परि + √ग्रह् + अप्। प्रमाणं - प्र + मा + ल्युट्।

अस्मिन् श्लोके धीरोदात्तःनायकः आत्मविश्वासं ~~प्रकटति~~

प्रकटयति। 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः।'

अलंकारोऽस्ति अर्थान्तरन्यास - अप्रस्तुत प्रशंसा।